## विभाषोशीनरेषु । (११८/१३४२)

[1]वृद्धात् इति वर्तते, वाहीकग्रामेभ्यः इति च । उशीनरेषु ये वाहीकग्रामाः, तद्वाचिभ्यो वृद्धेभ्यः [2]प्रातिपदिकेभ्यः विभाषा ठञ्ञिठौ प्रत्ययौ भवतः। आह्वजालिकी, [3]आह्वजालिका, आह्वजालीया । सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया ॥

## ओर्देशे ठञ् । (११९/१३४३)

वृद्धात् एति नावुवर्तते, उत्तरसूत्रे [4]पुनर्वृद्धग्रहणात् । उवर्णान्तात् देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः । [5]नैषादकर्षुकः । [6]शाबरजम्बुकः । देशे इति किम् ? पटोश्छात्राः पाटवाः[7] । ठञ्ञिठयोः प्रकरणे ठञः केवलस्यानुवृत्तिः [8]न लभ्यते इति[9] ठञ्ग्रहणं कृतम् ॥

## वृद्धात् प्राचाम् । (१२०/१३४४)

ओर्देशे[10] इत्येव । उवर्णान्तात् वृद्धात् प्राग्देशवाचिनः [11]प्रातिपदिकात् ठञ् प्रत्ययो भवति [12]शैषिकः । [13]आढकजम्बुकः । [14]शाकजम्बुकः । [15]नापितवास्तुकः (म. भा. २.२९७) । पूर्वेणैव [16]ठञि सिद्धे नियमार्थं वचनम्, [17]वृद्धादेव प्राचाम् अवृद्धान्न भवति इति । मल्लवास्तु – [18]माल्लवास्तवः ॥

## धन्वयोपधाद् वुञ् । (१२१/१३४५)

वृद्धात् इति वर्तते, देशे इति च । धन्ववाचिनो यकारोपधाच्च [19]देशाभिधायिनो वृद्धात् प्रातिपदिकात् वुञ् प्रत्ययो भवति शैषिकः । धन्वशब्दो [20]मरुदेशवचनः । [21]पारेधन्वकः । ऐरावतकः । योपधात् – सांकाश्यकः (म. भा. २.२९७) । [22]काम्पिल्यकः ॥

## प्रस्थपुरवहान्ताच्च । (१२२/१३४६)

वृद्धात् इत्येव, देशे इति [23]च । [24]अन्तशब्दः प्रत्येकमभिसम्बध्यते । प्रस्थ पुर वह [25]इत्येवमन्तात् देशवाचिनः प्रातिपदिकाद् [26]वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । मालाप्रस्थकः[27] । [28]नान्दीपुरकः । (म. भा. २.२९८) । [29]कान्तीपुरकः । पैलुवहकः । [30]फाल्गुनीवहकः । [31]पुरान्तो रोपधस्ततः [32]उत्तरसूत्रेणैव सिद्धमप्रागर्थमिह [33]ग्रहणम् ॥

## रोपधेतोः प्राचाम् । (१२३/१३४७)

वृद्धात् इत्येव, देशे इति च । तद्विशेषणं प्राग्ग्रहणम् । [34]रोपधात् ईकारान्ताच् च प्राग्देशवाचिनो वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । [35]पाटलिपुत्रकाः । ऐकचक्रकाः । [36]ईतः खल्वपि – [37]काकन्दी । काकन्दकः । माकन्दी । माकन्दकः । प्राचाम् इति किम् ? [38]दात्तामित्रीयः । तपरकरणं विस्पष्टार्थम् ॥

---

1. वाक्यमिदं नास्ति फ. 2. शब्देभ्यः फ. 3. ओकजालिकी, ओकजालिका, ओकजालकीया ड. 4. पुनर् नास्ति फ. 5. नैषातकर्षुकः ह, नैषाहकर्षुकः ड. 6. शीबरजम्बुकः ड. 7. छात्राः इत्यधिकम् फ. 8. न भवति फ, अलभ्या क. 9. पुनः इत्यधिकम् फ. 10. ठञ् इत्यधिकम् फ. 11. प्रातिपदिकात् नास्ति फ. 12. शैषिकः नास्ति फ. 13. आढकः क. 14. शाबरजम्बुकः क, नास्ति फ. 15. नापितवस्तुकः क, नाविकवास्तुकः ह. 16. ठञि नास्ति फ. 17. वृद्धादेव प्राचाम् नास्ति ब. 18. मल्लवास्तव्यः क. 19. देशवाचिनः क. फ. 20. मरुदेशवाची क. 21. पारेधन्वदेशे जातः इत्यधिकम् क. 22. काम्बिल्यकः ह. 23. च नास्ति फ. 24. अन्तः शब्दः ह. 25. अन्तादेशवाचिनः ह. 26. वृद्धात् नास्ति फ, वृद्धात् प्रातिपदिकात् क. 27. शौणाप्रस्थकः इत्यधिकम् क. ड. फ. 28. पुरान्तात् रोपधात् इत्यधिकम् फ. ह. 29. काञ्चीपुरकः ड. 30. फाल्मुतीवहकः ह. 31. पुरान्तात् रोपधात् ब. 32. उत्तरेणैव सिद्धे ड. क. ह. 33. वचनम् फ. 34. रेफोपधात् क. ब. 35. पाटलिपुत्रकः, ऐकचक्रकः ब. ह. 36. ईकः ह. 37. नास्ति ह, काकन्दा इ. 38. दात्तमित्रीयः फ. ह, दत्तमित्रीयः क.ड, चारमित्रीयः इत्यधिकम् ह.